श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ चतुर्दशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्दशः सर्गः ॥

## पञ्चवटीमार्गे जटायुषो दर्शनं तस्य श्रीरामं प्रति स्वस्य विस्तरेण परिचयदानम्

अथ पञ्चवटीं गच्छन्नन्तरा रघुनन्दनः।
आससाद महाकायं गृध्रं भीमपराक्रमम्॥ **3.14.1** ॥

तं दृष्ट्वा तौ महाभागौ वनस्थं रामलक्ष्मणौ।
मेनाते राक्षसं पक्षिं ब्रुवाणौ को भवानिति॥ **3.14.2** ॥

ततो मधुरया वाचा सौम्यया प्रीणयन्निव।
उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः॥ **3.14.3** ॥

स तं पितृसखं मत्वा पूजयामास राघवः।
स तस्य कुलमव्यग्रमथ पप्रच्छ नाम च॥ **3.14.4** ॥

रामस्य वचनं श्रुत्वा कुलमात्मानमेव च।
आचचक्षे द्विजस्तस्मै सर्वभूतसमुद्भवम्॥ **3.14.5** ॥

पूर्वकाले महाबाहो ये प्रजापतयोऽभवन्।
तान् मे निगदतः सर्वानादितः शृणु राघव॥ **3.14.6** ॥

कर्दमः प्रथमस्तेषां विकृतस्तदनन्तरम्।
शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान्॥ **3.14.7** ॥

स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः।
पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा ॥ **3.14.8** ॥

दक्षो विवस्वानपरोऽरिष्टनेमिश्च राघव।
कश्यपश्च महातेजास्तेषामासीच्च पश्चिमः ॥ **3.14.9** ॥

प्रजापतेस्तु दक्षस्य बभूवुरिति विश्रुताः।
षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥ **3.14.10** ॥

कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः।
अदितिं च दितिं चैव दनूमपि च कालकाम् ॥ **3.14.11** ॥

ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि।
तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत् ॥ **3.14.12** ॥

पुत्रांस्त्रैलोक्यभर्तॄन् वै जनयिष्यथ मत्समान्।
अदितिस्तन्मना राम दितिश्च दनुरेव च ॥ **3.14.13** ॥

कालका च महाबाहो शेषास्त्वमनसोऽभवन्।
अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिन्दम ॥ **3.14.14** ॥

आदित्या वसवो रुद्रा अश्विनौ च परन्तप।
दितिस्त्वजनयत् पुत्रान् दैत्यांस्तात यशस्विनः ॥ **3.14.15** ॥

तेषामियं वसुमती पुराऽऽसीत् सवनार्णवा।
दनुस्त्वजनयत् पुत्रमश्वग्रीवमरिंदम ॥ **3.14.16** ॥

नरकं कालकं चैव कालकापि व्यजायत।
क्रौञ्चीं भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीम् ॥ **3.14.17** ॥

ताम्रा तु सुषुवे कन्याः पञ्चैता लोकविश्रुताः।
उलूकाञ्जनयत् क्रौञ्ची भासी भासान् व्यजायत ॥ **3.14.18** ॥

श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः।
धृतराष्ट्री तु हंसांश्च कलहंसाश्च सर्वशः॥ **3.14.19** ॥

चक्रवाकांश्च भद्रं ते विजज्ञे सापि भामिनी।
शुकी नतां विजज्ञे तु नतायां विनता सुता॥ **3.14.20** ॥

दश क्रोधवशा राम विजज्ञेऽप्यात्मसम्भवाः।
मृगीं च मृगमन्दां च हरीं भद्रमदामपि॥ **3.14.21** ॥

मातङ्गीमथ शार्दूलीं श्वेतां च सुरभीं तथा।
सर्वलक्षणसम्पन्नां सुरसां कद्रुकामपि॥ **3.14.22** ॥

अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम।
ऋक्षाश्च मृगमन्दायाः सृमराश्चमरास्तथा॥ **3.14.23** ॥

ततस्त्विरावतीं नाम जज्ञे भद्रमदा सुताम्।
तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः॥ **3.14.24** ॥

हर्याश्च हरयोऽपत्यं वानराश्च तपस्विनः।
गोलाङ्गूलाश्च शार्दूली व्याघ्रांश्चाजनयत् सुतान्॥ **3.14.25** ॥

मातङ्ग्यास्त्वथ मातङ्गा अपत्यं मनुजर्षभ।
दिशागजं तु काकुत्स्थ श्वेता व्यजनयत् सुतम्॥ **3.14.26** ॥

ततो दुहितरौ राम सुरभिर्द्वे व्यजायत।
रोहिणीं नाम भद्रं ते गन्धर्वीं च यशस्विनीम्॥ **3.14.27** ॥

रोहिण्यजनयद् गावो गन्धर्वी वाजिनः सुतान्।
सुरसाजनयन्नागान् राम कद्रूश्च पन्नगान्॥ **3.14.28** ॥

मनुर्मनुष्याञ्जनयत् कश्यपस्य महात्मनः।
ब्राह्मणान् क्षत्रियान् वैश्याञ्शूद्रांश्च मनुजर्षभ॥ **3.14.29** ॥

मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा।
ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इति श्रुतिः॥ **3.14.30** ॥

सर्वान् पुण्यफलान् वृक्षाननलापि व्यजायत।
विनता च शुकीपौत्री कद्रूश्च सुरसास्वसा॥ **3.14.31** ॥

कद्रूर्नागसहस्रं तु विजज्ञे धरणीधरान्।
द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च॥ **3.14.32** ॥

तस्माज्जातोऽहमरुणात् सम्पातिश्च ममाग्रजः।
जटायुरिति मां विद्धि श्येनीपुत्रमरिन्दम॥ **3.14.33** ॥

सोऽहं वाससहायस्ते भविष्यामि यदीच्छसि।
इदं दुर्गं हि कान्तारं मृगराक्षससेवितम्।
सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे॥ **3.14.34** ॥

जटायुषं तु प्रतिपूज्य राघवो
 मुदा परिष्वज्य च सन्नतोऽभवत्।
पितुर्हि शुश्राव सखित्वमात्मवान्
 जटायुषा सङ्कथितं पुनः पुनः॥ **3.14.35** ॥

स तत्र सीतां परिदाय मैथिलीं
 सहैव तेनातिबलेन पक्षिणा।
जगाम तां पञ्चवटीं सलक्ष्मणो
 रिपून् दिधक्षञ्शलभानिवानलः॥ **3.14.36** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुर्दशः सर्गः॥